# Sarvasaubhagyadayakam Vajrapanjaram Brahmalekhini Kavacham

# સર્વસૌભાગ્યદાયકં વજ્રપઞ્જરં બ્રહ્મલેખિનીકવચમ્

## Document Information

Text title : Brahmalekhini Kavacham

File name : brahmalekhinIkavacham.itx

Category : devii, devI, dashamahAvidyA, kavacha

Location : doc_devii

Transliterated by : Durga Sharma

Proofread by : Durga Sharma

Description/comments : From Brahmvidya Sampradaya

Latest update : June 1, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 1, 2026

*sanskritdocuments.org*

# સર્વસૌભાગ્યદાયકં વજ્રપઞ્જરં બ્રહ્મલેખિનીકવચમ્

શ્રીપરકૃષ્ણ ઉવાચ-
લેખિની મહાવિદ્યા કોટિકલ્પેષુ દુર્લભા ।
શ‍ૃણુ કવચસ્યાસ્ય ઋષિઃ પરબ્રહ્મસ્મૃતઃ ॥ ૧॥

છન્દોઽનુષ્ટુપ્ પ્રોક્તા દેવતા લેખિનીશ્વરી ।
વાગ્ભવબીજં ચ શક્તિકૂટબીજકમ્ ॥ ૨॥

કૂર્ચબીજોત્કીલનાં સૌભાગ્યનિર્ણયાય ચ ।
મદીયાઙ્ગુલિપિસંશોધનાર્થે વિનિયોગઃ સ્મૃતઃ ॥ ૩॥

॥ અથ કવચમ્ ॥

પ્રણવં મે શિરઃ પાતુ માયાં ચ મમ ભાલકમ્ ।
એકાક્ષરી પરા શક્તિઃ સ્રવન્તી પાતુ ચક્ષુષી ॥ ૪॥

ત્ર્યક્ષરી ત્ર્યમ્બકાકારા નાસિકાં મે સદાવતુ ।
ચતુરક્ષરી મહામાયા મુખં મે પાતુ સર્વદા ॥ ૫॥

પઞ્ચદશાક્ષરી નિત્યા જિહ્વાં રક્ષેત્ કુલેશ્વરી ।
ષોડશી ષોડશાર્ણા ચ કણ્ઠં મે પાતુ ચિન્મયી ॥ ૬॥

ઐં હ્રીં ઐં સમ્પુટાકારા કર્ણયુગ્મં સદાવતુ ।
ક્લીં બ્લૂં ક્લીં બીજરૂપા ચ કપોલૌ મે સદાવતુ ॥ ૭॥

માયાબીજં મહાદીપ્તં દન્તપઙ્ક્તિં મમાવતુ ।
કૂર્ચબીજં પરાકારં ચિબુકં મે સદાવતુ ॥ ૮॥

વધૂબીજં મહાગુહ્યં રસનાં મે સદાવતુ ।
લેખિની સર્વવર્ણેશા ગ્રીવાં પાતુ મહોત્કટ ॥ ૯॥

ગાયત્રી પાતુ મે સ્કન્ધૌ સાવિત્રી બાહુયુગ્મકમ્ ।
સરસ્વતી કરૌ પાતુ તારા અઙ્ગુલીમૂલકમ્ ॥ ૧૦॥

ઉગ્રતારા નખાગ્રં ચ નીલસરસ્વતી તથા ।
વક્ષઃસ્થલં સદા રક્ષેત્ શારદા સર્વમઙ્ગલા ॥ ૧૧॥

શ્યામા પાતુ દ્વિપાર્શ્વં ચ માતઙ્ગી સ્તનમણ્ડલમ્ ।
બગલામુખી મહોદગ્રો નાભિં પાતુ ભયાતુર ॥ ૧૨॥

રાજમાતઙ્ગિની પાતુ જઠરં કુક્ષિભાગકમ્ ।
મહાપિશાચિની રક્ષેત્ પૃષ્ઠવંશં સમન્તતઃ ॥ ૧૩॥

કોટિશ્વરી કટિં પાતુ કલ્પભેદિની ગુહ્યકમ્ ।
હસ્તિયોગિની મે ઊરૂ રહસ્યયોગિની તથા ॥ ૧૪॥

બ્રાહ્મી પાતુ જાનુયુગ્મં બ્રહ્મયોગિની જઙ્ઘકમ્ ।
બ્રહ્મલેખિની પાતુ પાદૌ બ્રહ્માણી પાદપૃષ્ઠકમ્ ॥ ૧૫॥

અક્ષરા પાતુ પાદાઙ્ગુલીઃ મહાસરસ્વતી તથા ।
નીલાદેવી સર્વગાત્રં પાતુ માં સર્વસઙ્કટે ॥ ૧૬॥

આદિશારદા સદા રક્ષેત્ સ્વપ્ને જાગરણે પથિ ।
વીણાપાણિર્જ્ઞાનમયી સર્વદિક્ષુ સદાવતુ ॥ ૧૭॥

દુર્ગા દુર્ગતિકા પાતુ સઙ્ગ્રામે રાજમન્દિરે ।
પઞ્ચપ્રાણાન્ મહામાયા લેખિનીરૂપધારિણી ॥ ૧૮॥

રક્તમાંસમસ્થિમજ્જાં શુક્રં ત્વચં તથૈવ ચ ।
ધાતૂન સર્વાન્ શરીરે તુ પાતુ દેવ્યક્ષરેશ્વરી ॥ ૧૯॥

ભૂચરી ખેચરી ચૈવ પાતુ માં કુલવર્દ્ધિની ।
યાદૃશં રૂપમાસ્થાય વિલિખેદ્ દૈવમક્ષરમ્ ॥ ૨૦॥

તાદૃશં રૂપમાસ્થાય પાતુ માં સર્વતો વિભુઃ ।
ઇડા પિઙ્ગલા સુષુમ્ના નાડીતન્ત્રં મમાવતુ ॥ ૨૧॥

સહસ્રારદલપદ્મં મહાબિન્દું સદાવતુ ।
અક્ષરમાલા મહાદીપ્તા સર્વાઙ્ગં મે સદાવતુ ॥ ૨૨॥

બિન્દુદ્વન્દ્વમયી ચૈવ પાતુ મે નેત્રમણ્ડલમ્ ।
ત્રિકોણમધ્યસંવિષ્ટા ભ્રૂયુગં મે સદાવતુ ॥ ૨૩॥

કાદિરૂપા પાતુ કણ્ઠં હાદિરૂપા ચ હૃદ્ગતમ્ ।
સાદિરૂપા મહાદેવી નાભિદેશં સદાવતુ ॥ ૨૪॥

વાગ્ભવાઢ્યા મહાલેખા દક્ષિણં પાર્શ્વમાવતુ ।
કામકૂટાત્મિકા દેવી વામપાર્શ્વં સદાવતુ ॥ ૨૫॥

શક્તિકૂટા મહાગુહ્યા પૃષ્ઠભાગં સદાવતુ ।
લજ્જાબીજં મહાભાસક હૃદયન્તરં મમાવતુ ॥ ૨૬॥

શ્રીબીજં પાતુ મે કોશાં કૌલીં ચ પાતુ કૌલિકી ।
મન્ત્રલેખમયી નિત્યા બુદ્ધિં મે પાતુ સર્વદા ॥ ૨૭॥

ચિત્તં ચેતો મદીયં ચ જ્ઞાનરૂપં કલાવતી ।
અહઙ્કારં મમ રક્ષેત્ સર્વવિદ્યાવિશારદા ॥ ૨૮॥

શબ્દાક્ષરમયી રેખા શ્રોત્રેન્દ્રિયં મમાવતુ ।
સ્પર્શાક્ષરમયી નિત્યા ત્વગિન્દ્રિયં સદાવતુ ॥ ૨૯॥

રૂપાક્ષરમયી જ્યેષ્ઠા ચક્ષુરિન્દ્રિયમવાતુ ।
રસાક્ષરમયી શ્રેષ્ઠા જિહ્વેન્દ્રિયં મમાવતુ ॥ ૩૦॥

ગન્ધાક્ષરમયી શુદ્ધા ઘ્રાણેન્દ્રિયં સદાવતુ ।
વાક્પાણિપાદપાયૂંશ્ચ પાતુ દેવ્યક્ષરેશ્વરી ॥ ૩૧॥

જાગ્રદવસ્થાં સદા રક્ષેત્ વિશ્વરૂપા પરાત્પરા ।
સ્વપ્નાવસ્થાં મહાસૂક્ષ્મા તૈજસાખ્યા સદાવતુ ॥ ૩૨॥

સુષુપ્ત્યવસ્થાં નિત્યં મે પ્રાજ્ઞરૂપા મમાવતુ ।
તુરીયાસ્થાં મહાશૂન્યા બિન્દુરૂપા સદાવતુ ॥ ૩૩॥

પૂર્વસ્યાં પાતુ માં વાણી આગ્નેય્યાં તારિણી તથા ।
દક્ષિણસ્યાં મહાશ્યામા નૈરૃત્યાં ઉગ્રતારિણી ॥ ૩૪॥

પશ્ચિમાયાં મહાદુર્ગા વાયવ્યાં બગલામુખી ।
ઉત્તરસ્યાં સદા રક્ષેત્ માતઙ્ગી રાજમાતુલ ॥ ૩૫॥

ઐશાન્યાં પાતુ માં બ્રાહ્મી ઊર્ધ્વં બ્રહ્મમયી પરા ।
અધસ્તાત્ પાતુ માં નિત્યં પાતાલવાસિની શિવા ॥ ૩૬॥

દિગ્વિદિક્ષુ ચ સર્વત્ર સર્વવ્યાપિની લેખિની ।
વજ્રરેખાપરિધૃતે રક્ષેત્ માં કુલમન્દિરે ॥ ૩૭॥

યન્ત્રલેખમહાપ્રાચી મન્ત્રકીલનસંસ્કૃતા ।

મહાપિશાચમન્ત્રેભ્યો રક્ષેત્ માં સર્વદા વિભુઃ ॥ ૩૮॥

જલમધ્યે સ્થલમધ્યે ચ રણે રાજકુલે પથિ ।
મહાશૈલતટે ઘોરે પાતુ માં કામરૂપિણી ॥ ૩૯॥

વિવાદે શાસ્ત્રચર્ચાયાં સભાયાં શત્રુસઙ્કટે ।
દન્તૌષ્ઠકણ્ઠજિહ્વાસુ પાતુ માં શારદા સ્વયમ્ ॥ ૪૦॥

અજ્ઞાનાત્ જ્ઞાનતો વાઽપિ યત્ ત્યક્તં કવચે મમ ।
તત્સ રક્ષેત્ મહાદેવી લેખિની સર્વમઙ્ગલા ॥ ૪૧॥

પાદતલાત્ શિરો યાવત્ શિરસઃ પાદતલકમ્ ।
વજ્રકોટિસમં ગાત્રં પાતુ દેવી નિરન્તરમ્ ॥ ૪૨॥

## કવચસ્ય ફલશ્રુતિઃ

ઇત્યેતત્કવચં દિવ્યં વજ્રપઞ્જરમુત્તમમ્ ।
ગુહ્યાદ્ગુહ્યતરં તત્ત્વં સર્વસૌભાગ્યદાયકમ્ ॥ ૧॥

ન દેયં યસ્ય કસ્યાપિ ગોપિતં કુલપુસ્તકે ।
યઃ પઠેચ્છૃણુયાદ્વાપિ ત્રિસન્ધ્યં નિયતઃ શુચિઃ ॥ ૨॥

તસ્ય હસ્તગતા સિદ્ધિઃ સાક્ષાદ્વાગીશ્વરો ભવેત્ ।
એતન્મહાકવચં ગુહ્યં યો ન જાનાતિ માનવઃ ॥ ૩॥

સ જપેત્ સતતં મન્ત્રં તસ્ય મન્ત્રો ન સિધ્યતિ ।
સારસ્વતં મહામન્ત્રં લેખિનીમન્ત્રમુત્તમમ્ ॥ ૪॥

દીક્ષિતોઽપિ કુલાચારે કોટિકલ્પૈર્ન વિન્દતિ ।
કવચેન વિના મર્ત્યો મન્ત્રજાપ્યં કરોતિ યઃ ॥ ૫॥

તસ્ય ભાગ્યક્ષયો યાતિ મન્ત્રાશ્ચ મલિનાસ્તથા ।
કોટ કલ્પં જપેદ્વાપિ શ્રમ એવ હિ કેવલમ્ ॥ ૬॥

તસ્માત્સર્વપ્રયત્નેન કવચં પ્રપઠેત્પુરા ।
પશ્ચાન્મન્ત્રં જપેત્પ્રાજ્ઞઃ સ સાક્ષાદ્ ભૈરવો ભવેત્ ॥ ૭॥

રક્ષાકામો મહામર્ત્યો યઃ કશ્ચિદ્ ભુવિ વર્તતે ।
તેન ન ગન્તવ્યં ક્વાપિ કવચેન વિના પદમ્ ॥ ૮॥

ન પદૈકં પ્રગચ્છેચ્ચ ન ચ ગચ્છેત્ કદાચન ।
વિના કવચપાઠાત્તુ માર્ગં નૈવ પ્રવિશેત્ પુમાન્ ॥ ૯॥

યદિ ગચ્છેત્ પ્રમાદેન મન્દબુદ્ધિઃ વિમોહિતઃ ।
તદૈવ તસ્ય વિઘ્નાનિ જાયન્તે સર્વતોમુખમ્ ॥ ૧૦॥

ભૂતપ્રેતપિશાચાશ્ચ ડાકિન્યો યાતુધાનાઃ ।
રિપવઃ શસ્ત્રહસ્તાશ્ચ તં હિંસન્તિ પદે પદે ॥ ૧૧॥

તસ્માદ્ ગૃહાદ્ વિનિષ્ક્રાન્તે કવચં ધારયેત્ પઠેત્ ।
તસ્ય પાદયુગે નિત્યં રક્ષા તિષ્ઠતિ સર્વદા ॥ ૧૨॥

ષણ્માસધારનાદસ્ય વજ્રકાયો ભવેન્નરઃ ।
ન શસ્ત્રૈર્ભિદ્યતે ગાત્રં ન ચાગ્નિર્દહતે કચિત્ ॥ ૧૩॥

વિષં સ્થાવરજઙ્ગમં કૃત્રિમં ચાભિચારિકમ્ ।
પ્રશામ્યેદમૃતં યાતિ કવચસ્ય પ્રભાવતઃ ॥ ૧૪॥

યઃ પઠેત્ પરમં દિવ્યં સ વશં નયતે જગત્ ।
રાજાનો રાજપુત્રાશ્ચ નાર્યશ્ચ કુલજાસ્તથા ॥ ૧૫॥

તસ્યાધીના ભવન્ત્યેવ દાસભૂતા નિરન્તરમ્ ।
મહોત્પાતે ચ દુર્ભિક્ષે શ્મશાને સઙ્કટે તથા ॥ ૧૬॥

કવચં સંસ્મરન્ મર્ત્યો હ્યક્ષતો વિજયાન્વિતઃ ।
લિખિત્વા ધારયેદ્યસ્તુ કણ્ઠે વા દક્ષિણ ભુજે ॥ ૧૭॥

તસ્ય ગેહે સ્થિરા લક્ષ્મીઃ વાણી ચ વદને વસેત્ ।
ઇતિ તે કથિતં ગર્ભ પરકૃષ્ણરહસ્યકમ્ ॥ ૧૮॥

ભાગ્યરેખાવિશોધનં સર્વકારણકારણમ્ ।
ન કાલો બાધતે તસ્ય ન મૃત્યુઃ પ્રભવત્યપિ ॥ ૧૯॥

ચિન્મયઃ સુભગો લોકે મહાકીર્તિસમન્વિતઃ ।
સર્વમાર્ગેષુ માં પાતુ પરકૃષ્ણો જગન્મયઃ ॥ ૨૦॥

ઇતિ સર્વસૌભાગ્યદાયકં વજ્રપઞ્જરં બ્રહ્મલેખિનીકવચમ્ સમ્પૂર્ણમ્ ।

Encoded and proofread by Durga Sharma

*Sarvasaubhagyadayakam Vajrapanjaram Brahmalekhini Kavacham*

pdf was typeset on June 1, 2026

Please send corrections to *sanskrit@cheerful.com*